Total Pages—4 C/17/DDE/MA/Part-II/Sans./7

2016

M. A.

Part-II Examination

SANSKRIT

Paper – VII

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

First Half [Marks–60]

1. संस्कृतनास्यसाहित्यनिर्माणे वङ्गीयविदुषामवदानं विशदीकुरत । 12

अथवा

बंगीयसंस्कृतसाहित्ये विरचितेषु महाकाव्येषु कयोश्चिद् द्वयोः वैशिष्ट्यं प्रस्तूयताम् ।

*(Turn Over)*

2. अधोलिखितेषु ग्रन्थेषु कयोश्चिद् द्वयोः समीक्षा कार्या — 4×2

a) चण्डताण्डवम् ।

b) चाणक्यविजयम् ।

c) बंगकीर्तिविधनम् ।

d) राजनीतिलीलामृतम् ।

3. बुद्धचरितमहाकाव्यस्य महाकाव्यत्वं कथं संगच्छते तद् विचार्यताम्। 14

अथवा

'ज्वलिष्यति ज्ञानमयो हि सूर्यः' इति कः कस्य विषये उक्तवान्। पूर्वापरविवेचन-सहितं विवेचयत ।

4. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या—6

a) सा लुम्बनी नाम्नि बने मनोज्ञे ध्यानप्रदे देववनादनूने ।
वासेच्छया प्राह प्रति प्रतीति सत्वानिभं दोहदमामनन्ति ॥

b) दीप्या च धैर्येण च यो रराज बालो रविर्भूमि-मिवावतीर्णः।
तथाति दीप्तोऽपि निरीक्ष्यमाणो जहार चक्षूंषि यथा शशाङ्कः॥

5. महाकाव्यस्य लक्षणमधिकृत्य रघुवंशमहाकाव्यस्य समीक्षा कार्या । 14

अथवा

रघुवंशप्रथमसर्गस्याधारेण वसिष्ठाश्रमं प्रति गमनवेलायां राज्ञा दिलीपेन दृष्टं प्राकृतिकं परिवेशं वर्णयत।





6. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या— 6

a) मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

b) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

## Second Half [Marks–40]

1. 'कारुण्यं भवभूतिरेव तनुते'—इति पङ्क्तेः व्याख्या सोदाहरणं कार्या। 14

अथवा

भवभूतिना प्रणीतस्य 'उत्तररामचरितम्' इति नाटकस्य प्रथमाङ्के उपस्थापितस्य चित्रदर्शनस्य नाटकीयतात्पर्यमालोच्यताम् ।

2. संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्यायताम् — 6

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकञ्च बह्निश्च नान्यतः शुद्धिमर्हतः ॥

अथवा

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जड़े
न तु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति च पुनर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥

3. पञ्चाननतर्करत्नविरचितस्य अमरमङ्गलनाटकस्य प्रथमाङ्कस्य समालोचनमूलकं समीक्षणं कर्त्तव्यम् । 14

अथवा

अमरमङ्गलनाटकानुसारं राज्ञः अमरसिंहस्य चरित्रमालोच्यताम् ।

4. संस्कृतभाषया देवनागरीलिपिमनुसृत्य च सप्रसङ्गं व्याख्यायताम् — 6

आजीवनं भवदुपासनमेव धर्म -
स्त्वद्गौरवाय मरणञ्च सुखं यदीयम् ।
तेषां त्वदभ्युदय-दर्शन-वञ्चितानां
मातर्दयस्व तनुजेषु भव प्रसन्ना ॥

अथवा

याते प्रतापतपने सहसा महास्तं
मेवारभूमिरखिला तिमिरावृतेयम् ।
अत्र स्थिताः सुविमला मणिदर्पणाश्च
विश्वतिषा विरहिता न तथा विभान्ति ॥

—o—